# संस्कृतम्
## (209)
## शिक्षक अंकितमूल्यांकनपत्रम्

पूर्णांकाः 20

**निर्देशाः**

(I) सर्वेप्रश्नाः अनिवार्याः। प्रश्नानुसारेण अंकाः प्रश्नसमक्षे दर्शिताः।

(ii) उत्तरपुस्तिकायाः प्रथमपृष्ठे स्वनाम, अनुक्रमांक-संख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत। 2x1=2

(क) ''सुभाषितानि'' इति पाठे प्रदत्तं दशकं धर्म-लक्षणं कथं भवान् स्वजीवने धारयिष्यति? लिखत।

(पाठ संख्या-1, सुभाषितानि)

(ख) ''प्रेरणा'' इति पाठस्य सारं स्वशब्देषु लिखत। (पाठ संख्या-2, प्रेरणा)

(ग) ''त्याज्यं न धैर्यम्'' इति पाठानुसारं जीवने धैर्यस्य महत्त्वं लिखत।

(पाठ संख्या-3, त्याज्यं न धैर्यम्)

(घ) 'यथा पृथिवी सर्वाः बाधाः सहमाना स्वकार्ये संलग्ना वर्तते तथैव अस्माभिः अपि सर्वदा स्वकर्त्तव्यस्य पालनं कर्त्तव्यम्' इति ''कस्मात् किं शिक्षेत?'' पाठानुसारं व्याख्यायताम्।

(पाठ संख्या-4, कस्मात किं शिक्षेत?)

2. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत। 2x1=2

(क) ''प्राणस्य श्रेष्ठत्वम्'' पाठं पठित्वा तस्मिन् पाठे प्रदत्तानाम् इन्द्रियाणां नामानि तेषां कार्याणि च लिखत।

(पाठ संख्या-5, प्राणस्य श्रेष्ठत्वम्)

(ख) ''यद्भविष्यो विनश्यति'' इति पाठे क्त्वा-ल्यप् प्रत्ययान्तानां पदानां चयनं कुरुत वाक्येषु प्रयोगं च प्रदर्शयत।

(पाठ संख्या-6, यद्भविष्यो विनश्यति)

(ग) कर्मवाच्ये कर्मणि प्रथमाविभक्तिः, कर्त्तरि च तृतीयाविभक्तिः भवति। क्रियायाः सम्बन्धः कर्मणा सह भवति। केषांचित् पञ्च-वाक्यानाम् उदाहरणं दत्त्वा वाच्यपरिवर्तनं कुरूत।

(पाठ संख्या-7, अयोध्यां प्रत्यागमनम्)

(घ) अभिवादनशीलस्य कानि चत्वारि वर्धन्ते? लिखत।

(पाठ संख्या-4, सुभाषितानि)

3. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्देषु लिखत। 2x1=2

(क) बोपदेवस्य बुद्धिः कथं विकासं प्राप्नोति? प्रेरणा इति पाठानुसारं लिखत। (पाठ संख्या-2, प्रेरणा)

(ख) ''समुत्पन्नेषु कार्येषु बुद्धिर्यस्य न हीयते।

स एव दुर्गं तरति जलस्थो वानरो यथा।।

''त्याज्यं न धैर्यम्'' इति पाठमाधृत्य व्याख्यायताम्।

(पाठ संख्या-3, त्याज्यं न धैर्यम्)

(ग) ''प्राणस्य श्रेष्ठत्वम्'' इति पाठात् कानिचित् पञ्चसंधिपदानि चित्वा तेषां सन्धिविच्छेदं प्रदर्शयत।

(पाठ संख्या-5, प्राणस्य श्रेष्ठत्वम्)

(घ) 'यद्भविष्यो विनश्यति' इति पाठस्य सारं स्वशब्देषु लिखत।

(पाठ संख्या-6, यद्भविष्यो विनश्यति)

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्देषु लिखत। 4x1=4

(क) ''प्रेरणा'' इति पाठानुसारं बोपदेवस्य चरित्रचित्रणं लिखत।

(पाठसंख्या-2, प्रेरणा)

(ख) ''त्याज्यं न धैर्यम्'' इति पाठं पठित्वा धैर्यमधिकृत्य कामपि अन्यां कथां दृष्टान्तं वा लिखत।

(पाठ संख्या-3, त्याज्यं न धैर्यम्)

(ग) ''कस्मात् किं शिक्षेत?'' इति पाठानुसारं बकात्, वृक्षात्, गर्दभात् सूर्यात् च काः शिक्षाः प्राप्यन्ते इति वर्णयत।

(पाठ संख्या-4, कस्मात् किं शिक्षेत?)

(घ) ''प्राणस्य श्रेष्ठत्वम्'' इति पाठे भवद्भिः पठितं यत् शरीरे प्राणाः एव श्रेष्ठाः। स्वमतानुसारं स्पष्टीकुरुत।

(पाठ संख्या-5, प्राणस्य श्रेष्ठत्वम्)

5. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्देषु लिखत। 4x1=4

(क) ''संसारे कोऽपि जीवः तुच्छः नास्ति। सर्वेषु पशुषु पक्षिषु वृक्षेषु च गुणाः सन्ति।'' ''कस्मात् किं शिक्षेत?'' पाठानुसारं वर्णयत।

(पाठसंख्या-4, कस्मात् किं शिक्षेत?)

(ख) 'यदभविष्यो विनश्यति' इति पाठे भवद्भिः पठितं यत् भाग्यापेक्षया पुरुषार्थेन एव जीवने सफलता प्राप्यते। पुरुषार्थमधिकृत्य कानिचित् पञ्चश्लोकानि अन्यपाठेभ्यः चित्वा लिखत।

(पाठ संख्या-6, यद्भविष्यो विनश्यति)

(ग) ''अयोध्यां प्रत्यागमनम्'' इति पाठे येषां पर्वतानां नदीनां च वर्णनं दत्तम् तान् भारतस्य मानचित्रे प्रदर्शयत।

(पाठ संख्या-7, अयोध्यां प्रत्ययागमनो)

(घ) ''सुभाषितानि'' इति पाठे प्रदत्तानां जीवनमूल्यानां महत्त्वं वर्णयत।

(पाठसंख्या-1, सुभाषितानि)

6. अधोलिखितेषु कमपि एकं विषयमधिकृत्य परियोजनाविवरणं लिखत। 6x1=6

(क) समाचारपत्रेभ्यः त्रयाणां चित्राणां संकलनं कृत्वा प्रत्येकस्य विषये पञ्चसंस्कृतवाक्येषु वर्णनं कुरुत।

(ख) अधोलिखितेषु कमपि कथापाठद्वयम् अधिकृत्य तत्र संज्ञापदानि, सर्वनामपदानि, विशेषणपदानि च चित्वा तालिका-निर्माणं कुर्वन्तु।

(i) प्रेरणा,

(ii) प्राणस्य श्रेष्ठत्वम्,

(iii) त्याज्यं न धैर्यम्,

(iv) यद्भविष्यो विनश्यति,

(ग) केषाञ्चित पञ्चकार्यालयानां कार्यशैलीं दृष्ट्वा तेषु प्रत्येकस्य कार्यालयस्य वर्णनं कुरूत यथा पत्रालयः, पुस्तकालयः, बैंककार्यालयः, चिकित्सालयः, वस्त्रनिर्माणशालाकार्यालयः, जलविभागकार्यालयः इत्यादयः।

(घ) सप्तम् पाठपर्यन्तम् कतमः पाठः भवद्भ्यः रोचते? तस्मात् का शिक्षा प्राप्यते? भवान् भवती स्वजीवने कथं तत् जीवनमूल्यं धारयिष्यति इति वर्णयत।